**Roll No. ...................................**

# D–3343

## B. A. (Classics) (Part II)
## EXAMINATION, 2020

SAHITYAM

**(Optional)**

Paper First

*Time : Three Hours* ]    [ *Maximum Marks : 75*

सूचना : सर्वे प्रश्नाः समाधेयाः।

1. केषाञ्चित् त्रयाणां अलङ्काराणां सोदाहरणं व्याख्या कर्तव्या— 24

    (i) उपमालङ्कारः

    (ii) उपमेयोपमालङ्कारः

    (iii) रूपकालङ्कारः

    (iv) अप्रस्तुतप्रशंसालङ्कारः

    (v) व्याजस्तुति-अलङ्कारः

    (vi) विरोधाभासालङ्कारः

    (vii) एकावल्यलङ्कारः

2. कयोश्चिद् द्वयोः कारिकयोः व्याख्या कर्तव्या— 16

(i) उत्साहावख्यस्थायिभावः प्रभावादिविभावभूः।
वीरोऽनुभावैः स्थैर्याद्यैर्भावैर्गर्वादिभिर्युतः॥

(ii) अविवक्षितवाच्यस्य द्वौ भेदौ वाच्यमेव चेत्।
अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्॥

(iii) अपरस्य रसादेश्चेदङ्गमन्यद्रसादिकम्।
हा हा मत्कुचकाश्मीरलिप्तभिन्नमुरः शरैः॥

(iv) धर्मं कञ्चित् पुरस्कृत्य प्रायः शब्दः प्रवर्त्तते।
यथार्थं स्पष्टमाचष्टे शब्दस्तामभिधां विदुः॥

(v) लक्षणीयस्वशब्दस्य मीलनानीलनाद् द्विधा।
लक्षणा सा त्रिधा सिद्धसाध्यसाध्याङ्ग भेदतः॥

3. कयोश्चिद् द्वयोः गद्यखण्डयोः सन्दर्भ-प्रसङ्गानुसारिणी व्याख्या विधेया— 20

(i) दयित, त्वत्प्रसादादद्य मे चरितार्था श्रोत्रवृत्तिः, अद्य मे मनसि तमोपहस्त्वया दत्तो ज्ञानप्रदीपः। पक्वमिदानीं त्वपादपद्मपरिचर्याफलम्। अस्य च त्वत्प्रसादस्य किमुपकृत्य प्रत्युपकृतवती भवेयम्। अभवदीयं हि नैव किञ्चिन्मत्सम्बद्धम्। अथवास्त्येवास्यापि जनस्य क्वचित्प्रभुत्वम्। अशक्यं हि मदिच्छया विना सरस्वतीमुखग्रहणोच्छेषणीकृतो दशनच्छद एष चुम्बयितुम्।

(ii) अथ तस्य राजकुमारस्य कमलमूढशशिकिरण-रज्जुदामनिगृतमिव रजतक्षृङ्खलोपगूढं चरणयुगलमासीत्। उपलभ्यैव च 'किमेतत्' इत्यति परित्रासविह्वला मुक्तकण्ठमाचक्रन्द राजकन्या।

(iii) स तु स्वभावधीरः सर्वपौरुषातिभूमिः सहिष्णु-तैकप्रतिबिम्बक्रियां दैवीमेव तामापदमवधार्य 'स्मर तस्या हंसगामिनी हंसकथायाः। सहस्व वासु मासद्वयं' इति प्राणपरित्यागरागिणी प्राणसभां समाश्वास्यारिवश्य-तामयासीत्॥

(iv) पातितञ्च कोपितेन कोऽपि तेन मयि शापः—'पापे, भजस्व लोहजातिमजातचैतन्या सती' इति। स पुनः प्रसाद्यमानस्त्वत्पादद्मद्वयस्य मासद्वयमात्रं सन्दानतामेत्य निरस्तरणीयामिभामापद परिक्षीणशक्तित्वं चेन्द्रियाणामकल्पयत्। अनलपेन च पाप्मना रजतश्रृङ्खलीभूतां मामैक्ष्वाकस्य राज्ञो वेगवतः पौत्रः पुत्रो मानसवेगस्य वीरशेखरो नाम विद्याधरः शंकरगिरौ समध्यगमत्। आत्मसात्कृता च तेनाहमासम्।

4. दशकुमारचरितस्य परिचयो देयः 15

अथवा

'कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः।' इत्युक्तिः समीक्ष्यताम्।

अथवा

दशकुमारचरितस्य उत्तरपीठिकायाः प्रथमोच्छ्वासस्य कथासारं लिखत।